**रेणुकासुत** पु० ६त० । परशुरामे रेणुकात्मजादयोऽप्यत्र ।

**रेणुरूषित** स्त्री रेणुभिः रूषितः । १गर्द्दभे त्रिका० स्त्रियां ङीष् । २धूलिधूसरे त्रि० ।

**रेणुसार** पु० रेणुरिव सारोऽस्य । १कर्पूरे त्रिका० । कप् । तत्रैवार्थे । [भावप्र० ।

**रेतजा** स्त्री रेत इव जायते जन-ड पृषो० । वालुकायां

**रेतस्** न० री-असुन् तुट् च । पुंसो रक्तादिपरिपाकजन्ये देहस्थे मज्जहेतुके चरमधातौ १शुक्रे शिववीर्य्ये २पारदे च मेदि० । [मेदि० ।

**रेत्र** न० री-त्र । १रेतसि २पीयूषे ३पटवासे ४सूतके च

**रेप** शब्दे अक० गतौ सक० भ्वा० आत्म० सेट् । रेपते अरेपिष्ट ऋदित् चङि न ह्रस्वः ।

**रेप** त्रि० रेप-अच् । १निन्दिते २क्रूरे ३कृपणे च मेदि० ।

**रेफ** पु० र+इफ । १रकारात्मके वर्णे । रिफ-अच् । २कुत्सिते त्रि० अमरः । [४कृपणे च शब्दर० ।

**रेफस्** त्रि० रेप-असुन् पस्य फः । १क्रूरे २अधमे, ३दुष्टे

**रेब(व)** गतौ सक० प्लुतौ अक० भ्वा० आ० सेट् । रेब(व)ते अरेबि(वि)ष्ट । ऋदित् चङि न ह्रस्वः ।

**रेभ** शब्दे भ्वा०आत्म०अक०सेट् । रेभते अरेभिष्ट । ऋदित् चङि न ह्रस्वः । [३बलरामश्वशुरे राजभेदे हरिवं० ।

**रेवत** पु० रेव-अतच् । १जम्बीरे जटा० २आरग्वधे शब्दचि०

**रेवती** स्त्री रेवतस्यापत्यमण् रेवत्यादीति निर्देशात् न वृद्धिः । १रेवतराजकन्यायां बलदेवपत्न्याम् । रेव-अतच् गौ० ङीष् । अश्विन्यवधितः सप्तविंशतिसंख्याते २नक्षत्रे, ३तत्संख्यायां, ४मातृकाभेदे मेदि० । ५स्त्रीगव्याम् अजयपा० ६नदीभेदे, ७दुर्गायाञ्च देवीपु० । ८रेवतीपदघटितायां ऋचि च "एतस्यैव रेवतीषु वारवन्तीयम्" श्रुतिः । ९पञ्चममनुपत्न्याम् । [४६३१पृ० दृश्यम् ।

**रेवतीभव** पु० ७त० । शनैश्चरे हेमच० । भगदैवतशब्दे

**रेवतीरमण** पु० रेवतीं रमयति रम-णिच्-ल्यु । बलरामे । ६त० । रेवतीशादयोऽप्यत्र । [सूत्रे दृश्यम् ।

**रेवत्यादि** पु० अपत्यार्थे ठक्प्रत्ययनिमित्ते शब्दगणे । पा०ग०

**रेवन्त** पु०रेव-झच् ।१गुह्यकाधिपतौ २सूर्य्यपुत्रभेदे च वह्निपु० ।

**रेवा** स्त्री रेव-अच् ।१नर्मदाख्यनद्याम् अमरः । २कामपत्न्यां ३नीलीवृक्षे च मेदि० ४दुर्गायां देवीपु० ।

**रेष** हेषायां (घोटकशब्दे) भ्वा० आत्म० अक० सेट् । रेषते अरेषिष्ट । ऋदित् चङि न ह्रस्वः ।

**रै** शब्दे भ्वा० पर० अक० अनिट् । रायति अरासीत् ।

**रै** पु० रा-डै । १धने २स्वर्णे अमरः । ३शब्दे शब्दर० अस्य हलादौ सुपि आत्त्वम् राभ्यामित्यादि । [पातादौ ।

**रैत्य** त्रि० रीतेः पित्तलस्य विकारः रीति+ष्यञ् । पित्तलमये

**रैवत** पु० रेवत्या नद्या अदूरो देशः अञ् । द्वारिकासमीपस्थे १पर्वतभेदे २स्वर्णालुवृक्षे, ३शिवे मेदि० । ४दैत्यभेदे धरणिः । रेवत्यां भवः अण् । ५चतुर्दशसु मनुषु पञ्चमे मनुभेदे । ६शनैश्चरे च । [रेवतवृक्षे न० राजनि० ।

**रैवतक** पु० रैवतएव स्वार्थे क । १रैवतपर्वते हेमच० २पा-

**रोक** न० रु-कन् तस्य नेत्त्वम् । १छिद्रे अमरः "तन्मे रोकं च शोकञ्चेति" ति०त० । २नौकायाम् ३चले त्रि० मेदि० रुच-घञ् नि० कुत्वम् । क्रयकाले मूल्यदानेन क्रयात्मके ४क्रयभेदे ५दीप्तौ च पु० मेदि० ।

**रोग** पु० रुज-घञ् । १धातुवैषम्यजाते व्याधौ राजनि० २कुष्ठौषधे च (कुड़) मेदि० । [च ३रोगनाशके त्रि० ।

**रोगघ्न** न० रोगं हन्ति हन-टक् । १औषधे, २वैद्यकशास्त्रे

**रोगराज** पु० ६त० टच् समा० । राजयक्ष्मव्याधौ राजनि० ।

**रोगलक्षण** न०रोगो लक्ष्यते ज्ञायतेऽनेन लक्ष-करणे ल्युट् । रोगानुमापके धातुवैषम्यहेतुके चिह्नभेदे निदाने राजनि० "रोगस्तु दोषवैषम्यं दोषसाम्यमरोगता । रोगा दुःखस्य दातारो ज्वरप्रभृतयो हि ते । ते च स्वाभाविकाः केचित्केचिदागन्तवः स्मृताः । मानसाः केचिदाख्याताः कथिताः केऽपि कायिकाः" । तत्र स्वाभाविकाः शरीरस्वभावादेव जाताः क्षुत्पिपासास्वप्नादिजरामृत्युप्रभृतयः अथ वा स्वस्वभावादुत्पत्तेर्जाता स्वाभाविकाः सहजा इति यावत् । ते च जन्मान्धत्वादयः । आगन्तवोऽभिघातादिजनिताः । अथ वा जन्मोत्तरभाविनः कामक्रोधलोभमोहभयाभिमानदैन्यपैशुन्यशोकविषादेर्ष्यासूयामात्सर्य्यप्रभृतयः । अथ वा उन्मादापस्मारमूर्च्छाभ्रममोहतमःसंन्यासप्रभृतयः । कायिकाः पाण्डुरोगप्रभृतयः "कर्म्मजाः कथिताः केचिद्दोषजाः सन्ति चापरे । कर्म्मदोषोद्भवाश्चान्ये व्याधयस्त्रिविधाः स्मृताः" । तत्र कर्म्मजा व्याधयः यत्प्राक्तनदुष्कर्म्म प्रबलं केवलं भोगनाश्यम् प्रायश्चित्तनाश्यं वा ततो जाताः नतु दुष्टवातादिदोषेण जनितास्तथा । "यथाशास्त्रन्तु निर्णीतो यथाव्याधि चिकित्सितः । न शमं याति यो व्याधिः स ज्ञेयः कर्म्मजो बुधैः" । दोषजाः । मिथ्याहारविहारप्रकुपितवातपित्तकफजाः । नतु मिथ्याहारविहारिणामपि प्राक्तनसुकृतेन नैरुज्यं दृश्यत